# ShrI Batukabhairava Ashtottarashatanama Stotram

# શ્રીબટુકભૈરવાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : Batukabhairava Ashtottarashatanama Stotram 1

File name : baTukabhairavAShTottarashatanAmastotram.itx

Category : aShTottarashatanAma, shiva

Location : doc_shiva

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay, PSA Easwaran

Description-comments : rudra yAmale vishvasAroddhAre. See corresponding nAmAvalI

Source : Shivanama Manjari 1, page 480

Latest update : June 23, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

# શ્રીબટુકભૈરવાષ્ટોત્તરશતનામસ્તોત્રમ્

આપદુદ્ધારકબટુકભૈરવસ્તોત્રમ્

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીઉમામહેશ્વરાભ્યાં નમઃ ॥

॥ શ્રીગુરવે નમઃ ॥

॥ શ્રીભૈરવાય નમઃ ॥

મેરુપૃષ્ઠે સુખાસીનં દેવદેવં ત્રિલોચનમ્ ।
શઙ્કરં પરિપપ્રચ્છ પાર્વતી પરમેશ્વરમ્ ॥ ૧॥

શ્રીપાર્વત્યુવાચ -
ભગવન્સર્વધર્મજ્ઞ સર્વશાસ્ત્રાગમાદિષુ ।
આપદુદ્ધારણં મન્ત્રં સર્વસિદ્ધિકરં પરમ્ ॥ ૨॥

સર્વેષાં ચૈવ ભૂતાનાં હિતાર્થં વાઞ્છિતં મયા ।
વિશેષમતસ્તુ રાજ્ઞાં વૈ શાન્તિપુષ્ટિપ્રસાધનમ્ ॥ ૩॥

અઙ્ગન્યાસકરન્યાસદેહન્યાસસમન્વિતમ્ ।
વક્તુમર્હસિ દેવેશ મમ હર્ષવિવર્દ્ધનમ્ ॥ ૪॥

શઙ્કર ઉવાચ -
શ઼ૃણુ દેવિ મહામન્ત્રમાપદુદ્ધારહેતુકમ્ ।
સર્વદુઃખપ્રશમનં સર્વશત્રુવિનાશનમ્ ॥ ૫॥

અપસ્મારાદિ રોગાનાં જ્વરાદીનાં વિશેષતઃ ।
નાશનં સ્મૃતિમાત્રેણ મન્ત્રરાજમિમં પ્રિયે ॥ ૬॥

ગ્રહરોગત્રાણનાં ચ નાશનં સુખવર્દ્ધનમ્ ।
સ્નેહાદ્વક્ષ્યામિ તં મન્ત્રં સર્વસારમિમં પ્રિયે ॥ ૭॥

સર્વકામાર્થદં પુણ્યં રાજ્યં ભોગપ્રદં નૃણામ્ ।
આપદુદ્ધારણમિતિ મન્ત્રં વક્ષ્યામ્યશેષતઃ ॥ ૮॥

પ્રણવં પૂર્વમુદ્ધૃત્ય દેવી પ્રણવમુદ્ધરેત્ ।
બટુકાયેતિ વૈ પશ્ચાદાપદુદ્ધારણાય ચ ॥ ૯॥

કુરુ દ્વયં તતઃ પશ્ચાદ્બટુકાય પુનઃ ક્ષિપેત્ ।
દેવીં પ્રણવમુદ્ધૃત્ય મન્ત્રોદ્ધારમિમં પ્રિયે ॥ ૧૦॥

મન્ત્રોદ્ધારમિદં દેવી ત્રૈલોક્યસ્યાપિ દુર્લભમ્ ।
ૐ હ્રીં બટુકાય આપદુદ્ધારણાય કુરુ-કુરુ બટુકાય હ્રીં ।
અપ્રકાશ્યમિમં મન્ત્રં સર્વશક્તિસમન્વિતમ્ ॥ ૧૧॥

સ્મરણાદેવ મન્ત્રસ્ય ભૂતપ્રેતપિશાચકાઃ ।
વિદ્રવન્ત્યતિભીતા વૈ કાલરુદ્રાદિવ દ્વિજાઃ ॥ ૧૨॥

પઠેદ્વા પાઠયેદ્વાપિ પૂજયેદ્વાપિ પુસ્તકમ્ ।
અગ્નિચૌરભયં તસ્ય ગ્રહરાજભયં તથા ॥ ૧૩॥

ન ચ મારિભયં કિઞ્ચિત્સર્વત્રૈવ સુખી ભવેત્ ।
આયુરારોગ્યમૈશ્વર્યં પુત્રપૌત્રાદિ સમ્પદઃ ॥ ૧૪॥

ભવન્તિ સતતં તસ્ય પુસ્તકસ્યાપિ પૂજનાત્ ।
ન દારિદ્ર્યં ન દૌર્ભાગ્યં નાપદાં ભયમેવ ચ ॥ ૧૫॥

શ્રીપાર્વત્યુવાચ -
ય એષ ભૈરવો નામ આપદુદ્ધારકો મતઃ ।
ત્વયા ચ કથિતો દેવ ભૈરવઃકલ્પવિત્તમઃ ॥ ૧૬॥

તસ્ય નામ સહસ્રાણિ અયુતાન્યર્બુદાનિ ચ ।
સારં સમુદ્ધૃત્ય તેષાં વૈ નામાષ્ટશતકં વદ ॥ ૧૭॥

યાનિ સઙ્કીર્તયન્મર્ત્યઃ સર્વદુઃખવિવર્જિતઃ ।
સર્વાન્કામાનવાપ્નોતિ સાધકઃસિદ્ધિમેવ ચ ॥ ૧૮॥

ઈશ્વર ઉવાચ -
શ઼ૃણુ દેવિ પ્રવક્ષ્યામિ ભૈરવસ્ય મહાત્મનઃ ।
આપદુદ્ધારકસ્યેદં નામાષ્ટશતમુત્તમમ્ ॥ ૧૯॥

સર્વપાપહરં પુણ્યં સર્વાપત્તિવિનાશનમ્ ।

સર્વકામાર્થદં દેવિ સાધકાનાં સુખાવહમ્ ॥ ૨૦॥

સર્વમઙ્ગલમાઙ્ગલ્યં સર્વોપદ્રવનાશનમ્ ।
આયુષ્કરં પુષ્ટિકરં શ્રીકરં ચ યશસ્કરમ્ ॥ ૨૧॥

નામાષ્ટશતકસ્યાસ્ય છન્દોઽનુષ્ટુપ્ પ્રકીર્તિતઃ ।
બૃહદારણ્યકો નામ ઋષિર્દેવોઽથ ભૈરવઃ ॥ ૨૨॥

લજ્જાબીજં બીજમિતિ બટુકામેતિ શક્તિકમ્ ।
પ્રણવઃ કીલકં પ્રોક્તમિષ્ટસિદ્ધૌ નિયોજયેત્ ॥ ૨૩॥

અષ્ટબાહું ત્રિનયનમિતિ બીજં સમાહિતઃ ।
શક્તિઃ હ્રીં કીલકં શેષમિષ્ટસિદ્ધૌ નિયોજયેત્ ॥ ૨૪॥

ૐ અસ્ય શ્રીમદાપદુદ્ધારક-બટુકભૈરવાષ્ટોત્તરશતનામસ્તોત્રસ્ય
બૃહદારણ્યક ઋષિઃ । અનુષ્ટુપ્ છન્દઃ।
શ્રીમદાપદુદ્ધારક-બટુકભૈરવો દેવતા ।
બં બીજમ્ । હ્રીં વટુકાય ઇતિ શક્તિઃ । પ્રણવઃ કીલકમ્ ।
મમાભીષ્ટસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

॥ ઋષ્યાદિ ન્યાસઃ ॥

શ્રીબૃહદારણ્યકઋષયે નમઃ (શિરસિ)।
અનુષ્ટપ્ છન્દસે નમઃ (મુખે)।
શ્રીબટુકભૈરવ દેવતાયૈ નમઃ (હૃદયે)।
ૐ બં બીજાય નમઃ (ગુહ્યે)।
ૐ હ્રીં વટુકાયેતિ શક્તયે નમઃ પાદયોઃ ।
ૐ કીલકાય નમઃ (નાભૌ)।
વિનિયોગાય નમઃ સર્વાઙ્ગે ।
॥ ઇતિ ઋષ્યાદિ ન્યાસઃ ॥

॥ અથ કરન્યાસઃ ॥

ૐ હ્રાં વાં ઈશાનાય નમઃ અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ હ્રીં વીં તત્પુરુષાય નમઃ તર્જનીભ્યાં નમઃ ।
ૐ હ્રૂં વૂં અઘોરાય નમઃ મધ્યમાભ્યાં નમઃ ।
ૐ હ્રૈં વૈં વામદેવાય નમઃ અનામિકાભ્યાં નમઃ ।
ૐ હ્રૌં વૌં સદ્યોજાતાય નમઃ કનિષ્ઠિકાભ્યાં વમઃ ।

ॐ હ્રઃ વઃ પઞ્ચવક્ત્રાય મહાદેવાય નમઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
॥ ઇતિ કરન્યાસઃ ॥

॥ અથ હૃદયાદિ ન્યાસઃ ॥

ॐ હ્રાં વાં ઈશાનાય નમઃ હૃદયાય નમઃ ।
ॐ હ્રીં વીં તત્પુરુષાય નમઃ શિરસે સ્વાહા ।
ॐ હ્રૂં વૂં અઘોરાય નમઃ શિખાયૈ વષટ્ ।
ॐ હ્રૈં વૈં વામદેવાય નમઃ કવચાય હુમ્ ।
ॐ હ્રૌં વૌં સદ્યોજાતાય નમઃ નેત્રત્રયાય વૌષટ્ ।
ॐ હ્રઃ વઃ પઞ્ચવક્ત્રાય મહાદેવાય નમઃ અસ્ત્રાય ફટ્ ।
॥ ઇતિ હૃદયાદિ ન્યાસઃ ॥

અથ દેહન્યાસઃ ।
ભૈરવં મૂર્ધ્નિ વિન્યસ્ય લલાટે ભીમદર્શનમ્ ।
નેત્રયોર્ભૂતહનનં સારમેયાનુગં ભ્રુવોઃ ॥ ૨૫ ॥

કર્ણયોર્ભૂતનાથં ચ પ્રેતબાહું કપોલયોઃ ।
નાસૌષ્ઠયોશ્ચૈવ તથા ભસ્માઙ્ગં સર્પવિભૂષણમ્ ॥ ૨૬ ॥

અનાદિભૂતભાષ્યૌ ચ શક્તિહસ્તખલે ન્યસેત્ ।
સ્કન્ધયોર્દૈત્યશમનં વાહ્વોરતુલતેજસઃ ॥ ૨૭ ॥

પાણ્યોઃ કપાલિનં ન્યસ્ય હૃદયે મુણ્ડમાલિનમ્ ।
શાન્તં વક્ષસ્થલે ન્યસ્ય સ્તનયોઃ કામચારિણમ્ ॥ ૨૮ ॥

ઉદરે ચ સદા તુષ્ટં ક્ષેત્રેશં પાર્શ્વયોસ્તથા ।
ક્ષેત્રપાલં પૃષ્ઠદેશે ક્ષેત્રજ્ઞં નાભિદેશકે ॥ ૨૯ ॥

પાપૌઘનાશનં કટ્યાં બટુકં લિઙ્ગદેશકે ।
ગુદે રક્ષાકરં ન્યસ્યેત્તથોર્વોર્રક્તલોચનમ્ ॥ ૩૦ ॥

જાનુનોર્ઘુર્ઘુરારાવં જઙ્ઘયો રક્તપાણિનમ્ ।
ગુલ્ફયોઃ પાદુકાસિદ્ધં પાદપૃષ્ઠે સુરેશ્વરમ્ ॥ ૩૧ ॥

આપાદમસ્તકં ચૈવ આપદુદ્ધારકં તથા ।
પૂર્વે ડમરુહસ્તં ચ દક્ષિણે દણ્ડધારિણમ્ ॥ ૩૨ ॥

ખડ્ગહસ્તે પશ્ચિમાયાં ઘણ્ટાવાદિનમુત્તરે ।

આગ્નેય્યામગ્નિવર્ણં ચ નૈરૃત્યે ચ દિગમ્બરમ્ ॥ ૩૩॥

વાયવ્યાં સર્વભૂતસ્થમૈશાન્યે ચાષ્ટસિદ્ધિદમ્ ।
ઊર્ધ્વં ખેચારિણં ન્યસ્ય પાતાલે રૌદ્રરૂપિણમ્ ॥ ૩૪॥

એવં વિન્યસ્ય સ્વદેહસ્ય ષડઙ્ગેષુ તતો ન્યસેત્ ।
રુદ્રં મુખોષ્ઠયોર્ન્યસ્ય તર્જન્યોશ્ચ દિવાકરમ્ ॥ ૩૫॥

શિવં મધ્યમયોર્ન્યસ્ય નાસિકાયાં ત્રિશૂલિનમ્ ।
બ્રહ્માણં તુ કનિષ્ઠિક્યાં સ્તનયોસ્ત્રિપુરાન્તકમ્ ॥ ૩૬॥

માંસાસિનં કરાગ્રે તુ કરપૃષ્ઠે દિગમ્બરમ્ ।

અથ નામાઙ્ગન્યાસઃ ।
હૃદયે ભૂતનાથાય આદિનાથાય મૂર્દ્ધનિ ॥ ૩૭॥

આનન્દપાદપૂર્વાય નાથાય ચ શિખાસુ ચ ।
સિદ્ધસામરનાથાય કવચં વિન્યસેત્તતઃ ॥ ૩૮॥

સહજાનન્દનાથાય ન્યસેન્નેત્રત્રયેષુ ચ ।
પરમાનન્દનાથાય અસ્ત્રં ચૈવ પ્રયોજયેત્ ॥ ૩૯॥

એવં ન્યાસવિધિં કૃત્વા યથાવત્તદનન્તરમ્ ।
તસ્ય ધ્યાનં પ્રવક્ષ્યામિ યથા ધ્યાત્વા પઠેન્નરઃ ॥ ૪૦॥

શુદ્ધસ્ફટિકસઙ્કાશં નીલાઞ્જનસમપ્રભમ્ ।
અષ્ટબાહું ત્રિનયનં ચતુર્બાહું દ્વિબાહુકમ્ ॥ ૪૧॥

દંષ્ટ્રાકરાલવદનં નૂપુરારાવસઙ્કુલમ્ ।
ભુજઙ્ગમેખલં દેવમગ્નિવર્ણં શિરોરુહમ્ ॥ ૪૨॥

દિગમ્બરં કુમારીશં બટુકાખ્યં મહાબલમ્ ।
ખટ્વાઙ્ગમસિપાશં ચ શૂલં દક્ષિણભાગતઃ ॥ ૪૩॥

ડમરું ચ કપોલં ચ વરદં ભુજગં તથા ।
અગ્નિવર્ણં સમોપેતં સારમેયસમન્વિતમ્ ॥ ૪૪॥

ધ્યાત્વા જપેત્સુસંસ્પૃષ્ટઃ સર્વાન્કામાનવાપ્નુયાત્ ॥

ધ્યાત્વા જપેત્સુસંસ્પૃષ્ટઃ સર્વાન્કામાનવાપ્નુયાત્ ॥

મન્ત્રમહાર્ણવે સાત્ત્વિકધ્યાનમ્ -

વન્દે બાલં સ્ફટિકસદૃશં કુણ્ડલોભાસિતાઙ્ગં
દિવ્યાકલ્પૈર્નવમણિમયૈઃ કિઙ્કિણીનૂપુરાઢ્યૈઃ ॥

દીપ્તાકારં વિશદવસનં સુપ્રસન્નં ત્રિનેત્રં
હસ્તાગ્રાભ્યામ્બટુકેશં શૂલદણ્ડૈર્દધાનમ્ ॥ ૧॥

મન્ત્રમહાર્ણવે રાજસધ્યાનમ્ -
ઉદ્યદ્ભાસ્કરસન્નિભં ત્રિનયનં રક્તાઙ્ગરાગસ્રજં
સ્મેરાસ્યં વરદં કપાલમભયં શૂલં દધાનં કરૈઃ ॥

નીલગ્રીવમુદારભૂષણયુતં શીતાંશુખણ્ડોજ્જ્વલં
બન્ધૂકારુણવાસસં ભયહરં દેવં સદા ભાવયે ॥ ૨॥

મન્ત્રમહાર્ણવે તામસધ્યાનમ્ -
ધ્યાયેન્નીલાદ્રિકાન્તિં શશિશકલધરં મુણ્ડમાલં મહેશં
દિગ્વસ્ત્રં પિઙ્ગલાક્ષં ડમરુમથ સૃણિં ખડ્ગપાશાભયાનિ ॥

નાગં ઘણ્ટાં કપાલં કરસરસિરુહૈર્બિભ્રતં ભીમદંષ્ટ્રં,
દિવ્યાકલ્પં ત્રિનેત્રં મણિમયવિલસત્કિઙ્કિણીનૂપુરાઢ્યમ્ ॥ ૩॥

॥ ઇતિ ધ્યાનત્રયમ્ ॥

સાત્ત્વિકં ધ્યાનમાખ્યાતઞ્ચતુર્વર્ગફલપ્રદમ્ ।
રાજસં કાર્યશુભદં તામસં શત્રુનાશનમ્ ॥ ૧॥

ધ્યાત્વા જપેત્સુસંહૃષ્ટઃ સર્વાન્કામાનવાપ્નુયાત્ ।
આયુરારોગ્યમૈશ્વર્યં સિદ્ધ્યર્થં વિનિયોજયેત્ ॥ ૨॥

વિનિયોગઃ
ૐ અસ્ય શ્રીબટુકભૈરવનામાષ્ટશતકસ્ય આપદુદ્ધારણસ્તોમન્ત્રસ્ય,
બૃહદારણ્યકો નામ ઋષિઃ, શ્રીબટુકભૈરવો દેવતા, અનુષ્ટુપ્ છન્દઃ,
હ્રીં બીજમ્, બટુકાયેતિ શક્તિઃ, પ્રણવઃ કીલકં, અભીષ્ટતાં સિદ્ધ્યિર્થે
જપે વિનિયોગઃ ॥ હ્રીં હ્રૌં નમઃ શિવાય ઇતિ નમસ્કાર મન્ત્રઃ ॥

॥ અથ ધ્યાનમ્ ॥

વન્દે બાલં સ્ફટિકસદૃશં કુણ્ડલોદ્ભાસિવક્ત્રં
દિવ્યાકલ્પૈર્નવમણિમયૈઃ કિઙ્કિણીનૂપુરાઢ્યૈઃ ।
દીપ્તાકારં વિશદવદનં સુપ્રસન્નં ત્રિનેત્રં

હસ્તાગ્રાભ્યાં વટુકમનિશં શૂલદણ્ડૌ દધાનમ્ ॥
કરકલિતકપાલઃ કુણ્ડલી દણ્ડપાણિઃ
તરુણતિમિરનીલો વ્યાલયજ્ઞોપવીતી ।
ક્રતુસમયસપર્યાવિઘ્નવિચ્છિત્તિહેતુઃ
જયતિ વટુકનાથઃ સિદ્ધિદઃ સાધકાનામ્ ॥

શુદ્ધસ્ફટિકસઙ્કાશં સહસ્રાદિત્યવર્ચસમ્ ।
નીલજીમૂતસઙ્કાશં નીલાઞ્જનસમપ્રભમ્ ॥

અષ્ટબાહું ત્રિનયનં ચતુર્બાહું દ્વિબાહુકમ્ ।
દશબાહુમથોગ્રં ચ દિવ્યામ્બરપરિગ્રહમ્ ॥

દંષ્ટ્રાકરાલવદનં નૂપુરારાવસઙ્કુલમ્ ।
ભુજઙ્ગમેખલં દેવમગ્નિવર્ણં શિરોરુહમ્ ॥

દિગમ્બરમાકુરેશં બટુકાખ્યં મહાબલમ્ ।
ખટ્વાઙ્ગમસિપાશં ચ શૂલં દક્ષિણભાગતઃ ॥

ડમરું ચ કપાલં ચ વરદં ભુજગં તથા ।
આત્મવર્ણસમોપેતં સારમેયસમન્વિતમ્ ॥

॥ ઇતિ ધ્યાનમ્ ॥

॥ મૂલમન્ત્રઃ ॥

ૐ હ્રીં બટુકાયાપદુદ્ધારણાય કુરુ કુરુ બટુકાય હ્રીં ૐ
ઇસકા જપ ૧૧ ૨૧ ૫૧ યા ૧૦૮ બાર કરે

॥ અથ સ્તોત્રમ્ ॥
ૐ હ્રીં ભૈરવો ભૂતનાથશ્ચ ભૂતાત્મા ભૂતભાવનઃ ।
ક્ષેત્રજ્ઞઃ ક્ષેત્રપાલશ્ચ ક્ષેત્રજ્ઞઃ ક્ષત્રિયો વિરાટ્ ॥ ૧॥

શ્મશાનવાસી માંસાશી ખર્પરાશી સ્મરાન્તકઃ ।
રક્તપઃ પાનપઃ સિદ્ધઃ સિદ્ધિદઃ સિદ્ધસેવિતઃ ॥ ૨॥

કઙ્કાલઃ કાલશમનઃ કલાકાષ્ઠાતનુઃ કવિઃ ।
ત્રિનેત્રો બહુનેત્રશ્ચ તથા પિઙ્ગલલોચનઃ ॥ ૩॥

શૂલપાણિઃ ખડ્ગપાણિઃ કઙ્કાલી ધૂમ્રલોચનઃ ।
અભીરુર્ભૈરવીનાથો ભૂતપો યોગિનીપતિઃ ॥ ૪॥

ધનદોઽધનહારિ ચ ધનવાન્પ્રીતિવર્ધનઃ । પ્રતિભાનવાન્
નાગહારો નાગકેશો વ્યોમકેશો કપાલભૃત્ ॥ ૫॥ નાગપાશો

કાલઃ કપાલમાલિ ચ કમનીયઃ કલાનિધિઃ ।
ત્રિલોચનો જ્વલન્નેત્રસ્ત્રિશિખી ચ ત્રિલોકભૃત્ ॥ ૬॥ ત્રિલોકપઃ

ત્રિનેત્રતનયો ડિમ્ભઃ શાન્તઃ શાન્તજનપ્રિયઃ ।
બટુકો બટુવેશશ્ચ ખટ્વાઙ્ગવરધારકઃ ॥ ૭॥

ભૂતાધ્યક્ષો પશુપતિર્ભિક્ષુકઃ પરિચારકઃ ।
ધૂર્તો દિગમ્બરઃ શૂરો હરિણઃ પાણ્ડુલોચનઃ ॥ ૮॥

પ્રશાન્તઃ શાન્તિદઃ શુદ્ધઃ શઙ્કરપ્રિયબાન્ધવઃ ।
અષ્ટમૂર્તિર્નિધીશશ્ચ જ્ઞાનચક્ષુસ્તપોમયઃ ॥ ૯॥

અષ્ટાધારઃ ષડાધારઃ સર્પયુક્તઃ શિખીસખઃ ।
ભૂધરો ભુધરાધીશો ભૂપતિર્ભૂધરાત્મજઃ ॥ ૧૦॥

કઙ્કાલધારી મુણ્ડી ચ આન્ત્રયજ્ઞોપવીતવાન્ ।
variation કપાલધારિ મુણ્ડી ચ નાગયજ્ઞોપવીતવાન્ ।
જૃમ્ભણો મોહનઃ સ્તમ્ભી મારણઃ ક્ષોભણસ્તથા ॥ ૧૧॥

શુદ્ધનીલાઞ્જનપ્રખ્યો દૈત્યહા મુણ્ડવિભૂષિતઃ ।
બલિભુગ્ બલિભુઙ્નાથો બાલોઽબાલપરાક્રમઃ ॥ ૧૨॥

સર્વાપત્તારણો દુર્ગો દુષ્ટભૂતનિષેવિતઃ ।
કામી કલાનિધિઃ કાન્તઃ કામિનીવશકૃદ્વશી ॥ ૧૩॥

જગદ્રક્ષાકરોઽનન્તો માયામન્ત્રૌષધીમયઃ ।
સર્વસિદ્ધિપ્રદો વૈદ્યઃ પ્રભવિષ્ણુરિતીવ હિ હ્રીં ઓમ્ ॥ ૧૪॥

ફલશ્રુતિઃ ।
અષ્ટોત્તરશતં નામ્નાં ભૈરવાય મહાત્મનઃ ।
મયા તે કથિતં દેવિ રહસ્યં સર્વકામદમ્ ॥ ૧૫॥

ય ઇદં પઠતિ સ્તોત્રં નામાષ્ટશતમુત્તમમ્ ।
ન તસ્ય દુરિતં કિઞ્ચિન્ન રોગેભ્યો ભયં ભવેત્ ॥ ૧૬॥

ન ચ મારીભયં કિઞ્ચિન્ન ચ ભૂતભયં ક્વચિત્ ।
ન શત્રુભ્યો ભયં કિઞ્ચિત્પ્રાપ્નુયાન્માનવઃ ક્વચિત્ ॥ ૧૭॥

પાતકેભ્યો ભયં નૈવ યઃ પઠેત્સ્તોત્રમુત્તમમ્ ।
મારીભયે રાજભયે તથા ચૌરાગ્નિજે ભયે ॥ ૧૮॥

ઔત્પત્તિકે મહાઘોરે તથા દુઃખપ્રદર્શને ।
બન્ધને ચ તથા ઘોરે પઠેત્સ્તોત્રમનુત્તમમ્ ॥ ૧૯॥

સર્વં પ્રશમમાયાતિ ભયં ભૈરવકીર્તનાત્ ।
એકાદશસહસ્રં તુ પુરશ્ચરણમુચ્યતે ॥ ૨૦॥

યસ્ત્રિસન્ધ્યં પઠેદ્દેવિ સંવત્સરમતન્દ્રિતઃ ।
સ સિદ્ધિં પ્રાપ્નુયાદિષ્ટાં દુર્લભામપિ માનવઃ ॥ ૨૧॥

ષણ્માસં ભૂમિકામસ્તુ જપિત્વા પ્રાપ્નુયાન્મહીમ્ ।
રાજશત્રુવિનાશાર્થં પઠેન્માસાષ્ટકં પુનઃ ॥ ૨૨॥

રાત્રૌ વારત્રયં ચૈવ નાશયત્યેવ શાત્રવાન્ ।
જપેન્માસત્રયં મર્ત્યો રાજાનં વશમાનયેત્ ॥ ૨૩॥

ધનાર્થી ચ સુતાર્થી ચ દારાર્થી ચાપિ માનવઃ ।
પઠેન્ (જપેન્) માસત્રયં દેવિ વારમેકં તથા નિશિ ॥ ૨૪॥

ધનં પુત્રં તથા દારાન્પ્રાપ્નુયાન્નાત્ર સંશયઃ ।
રોગી ભયાત્પ્રમુચ્યેત બદ્ધો મુચ્યેત બન્ધનાત્ ॥ ૨૫॥

ભીતો ભયાત્પ્રમુચ્યેત દેવિ સત્યં ન સંશયઃ ।
નિગડૈશ્ચાપિ બદ્ધો યઃ કારાગેહે નિપાતિતઃ ॥ ૨૬॥

શૃઙ્ખલાબન્ધનં પ્રાપ્તં પઠેચ્ચૈવ દિવાનિશિ ।
યં યં ચિન્તયતે કામં તં તં પ્રાપ્નોતિ નિશ્ચિતમ્ ।
અપ્રકાશ્યં પરં ગુહ્યં ન દેયં યસ્ય કસ્યચિત્ ॥ ૨૭॥

સુકુલીનાય શાન્તાય ઋજવે દમ્ભવર્જિતે ।
દદ્યાત્સ્તોત્રમિમં પુણ્યં સર્વકામફલપ્રદમ્ ॥ ૨૮॥

જજાપ પરમં પ્રાપ્યં ભૈરવસ્ય મહાત્મનઃ ।
ભૈરવસ્ય પ્રસન્નાભૂત્સર્વલોકમહેશ્વરી ॥ ૨૯॥

ભૈરવસ્તુ પ્રહૃષ્ટોઽભૂત્સર્વગઃ પરમેશ્વરઃ ।
જજાપ પરયા ભક્ત્યા સદા સર્વેશ્વરેશ્વરીમ્ ॥ ૩૦॥

॥ ઇતિ શ્રીબટુકભૈરવાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Gopal Upadhyay gopal.j.upadhyay at gmail.com
PSA Easwaran

*ShrI Batukabhairava Ashtottarashatanama Stotram*

pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*